मथुरायान्तु किं वाच्यं जागरे हरिसन्निधौ।
कार्त्तिके बोधनीं प्राप्य ततः श्रेयः परं न हि॥
मथुरायां प्रबोधन्यां कृतजागरणस्य हि।
चण्डालेदानतो वैश्योऽमोचयद्ब्रह्मराक्षसम्॥
जागरस्य च माहात्म्ये गीतवादित्रनर्त्तनम्।
हरेः प्रीतिकरं रात्रौ वक्तुं मे नैव शक्यते॥
यस्तु गायति कृष्णाग्रे कौमुदीं द्वादशीं क्षणम्।
सर्व्वलोकान् परित्यज्य विष्णुलोकं स गच्छति॥"
अतएवोक्तं तत्रैव।
"राज्यमन्यत्र संत्यज्य स्फीतं निहतकण्टकम्।
कार्त्तिके मथुरायां वै कौमुद्यां जागरं चरेत्॥"
अथ पारणादिनकृत्यम्।
"प्रातर्नित्यक्रियां कृत्वा शक्त्या संभोज्य भूसुरान्।
यजन् कृतव्रताच्छेद्रं प्रदद्याद्दक्षिणादिकम्॥
दानं यथाव्रतं तेभ्यो दत्त्वा पारणमाचरेत्।
प्रवर्त्तयेच्च संत्यक्तं चातुर्मास्यव्रतेषु यत्॥"
तथा च भविष्योत्तरे तत्रैव।
"प्रभाते विमले स्नात्वा भोजयेदन्नविस्तरैः॥
घृतक्षीरदधिक्षौद्रकासारगुड़मोदकैः।
अर्च्चयेच्चन्दनैः स्रग्भिः पुष्पैर्गन्धैर्द्विजोत्तमान्॥
आचार्य्येभ्यस्ततो दद्यात्तत्रत्यं यत्किञ्चिदेव हि।
सुवाचा सुमनोऽभीष्टपत्रपुष्पफलादिकम्॥
चतुरो वार्षिकान्मासान् नियमं यस्य यत् कृतम्।
कथयित्वा द्विजेभ्यस्तद्दद्याद्भक्त्या सुदक्षिणाम्॥"
एवमेव पाद्मे। तत्रैव किञ्चाधिकम्।
"चातुर्म्मास्यव्रते विप्राः पश्चाद्दक्षिद्रवाचनम्॥"
इति श्रीहरिभक्तिविलासे १६ विलासः॥

प्रबोधिनी, स्त्री, (प्रबोधयति हरिमिति। प्र+बुध्+णिच्+णिनिः। ङीप्।) प्रबोधनी। उत्थानैकादशी। यथा,—

वराह उवाच।
"उपवासासमर्थानां सदैव पृथुलोचने!।
एका सा द्वादशी पुण्या उपोष्या या प्रबोधिनी॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम्।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीफलम्॥
पूर्व्वभाद्रपदा योगे सैव वा द्वादशी भवेत्।
अतीव महती तस्यां सर्व्वकृत्यमथाक्षयम्॥
उत्तराङ्गारसहिता यदि चैकादशी भवेत्।
तदा कोटिगुणं पुण्यं केशवाल्लभते फलम्॥
सर्व्वदेवार्च्चिते तस्यां सर्व्वं कृतमिहाक्षयम्।
यथा प्रबोधिनी पुण्या तथा यस्यां स्वपेद्धरिः॥
उपोष्या हि महाभागे! अनन्तफलदा हि सा।
शयने बोधने चैव हरेस्तु परिवर्त्तने॥
उपोष्यैव विधानेन नरो निर्म्मलतां व्रजेत्।
तस्मात् सर्व्वप्रयत्नेन द्वादशीं समुपोषयेत्॥
यदीच्छेत विशालाक्षि! शाश्वतीं गतिमात्मनः।
एकादशी सोमयुक्ता कार्त्तिके मासि भामिनि!।
उत्तराभद्रसंयोगे अनन्ता सा प्रकीर्त्तिता॥
तस्यां यत् क्रियते भद्रे! सर्व्वमानन्त्यमश्नुते।
अनन्तपुण्यफलदा तेनानन्ता स्मृता प्रिये!॥
एकादशी भौमयुता यदा स्याद्भूतधारिणि!॥
स्नात्वा देवं समभ्यर्च्य प्राप्नोति परमं फलम्।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीं नरः॥
जलपूर्णं तदा कुम्भं स्थापयित्वा विचक्षणः।
पञ्चरत्नसमोपेतं घृतपात्रयुतं तथा॥
तस्यां स्कन्धे तु धरितं मत्स्यरूपं जनार्द्दनम्।
माषकेण सुवर्णेन सुतप्तेन वरानने!॥
स्नापयित्वा विधानेन कुङ्कुमेन विलेपितम्।
पीतवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम्॥
पूजयेत् कमलैर्द्देवि! मद्भक्तः संजितेन्द्रियः।
मत्स्यं कूर्म्मं वराहञ्च नारसिंहञ्च वामनम्॥
रामं रामञ्च कृष्णञ्च बुद्धञ्चैव तु कल्किनम्।
एवं दशावतारांश्च पूजयेद्भक्तिसंयुतः॥
पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि।
संपूज्यैवमलङ्कारैर्विविधैः पूजनञ्चरेत्॥
ततस्तस्याग्रतो देयं नैवेद्यं पाचितं चितम्।
एवं संपूज्य गोविन्दं दिवापि कमलेक्षणम्॥
रात्रौ चोत्थापनं कार्य्यं देवदेवस्य सुव्रते!।
प्रभाते विमले स्नात्वा भक्त्या संपूज्य केशवम्॥
पुष्पधूपादिनैवेद्यैः फलैर्नानाविधैः शुभैः।
ततस्तु पूजयेद्विद्वानाचार्य्यं भक्तिसंयुतः॥
अलङ्कारोपहारैश्च वस्त्राद्यैश्च स्वशक्तितः।
पूजयित्वा विधानेन तं देवं प्रतिपादयेत्॥
जगदादे जगद्रूप अनादे जगदादिकृत्।
जलशायिन् जगद्योने प्रीयतां मे जनार्द्दन!॥
अनेनैव विधानेन कुर्य्यादेकादशीं नरः।
तस्य पुण्यं भवेद्यत्तु तच्छृणुष्व वसुन्धरे!॥
यदि वक्त्रसहस्राणां सहस्राणि भवन्ति हि।
संख्यातुं नैव शक्यन्ते प्रबोधिन्यास्तथा गुणाः॥
तथाप्युद्देशमात्रेण शक्त्या वक्ष्यामि तच्छृणु।
चन्द्रतारार्कसङ्काशमधिष्ठायानुजीविभिः॥
सहैव यानमागच्छेन्मम लोकं वसुन्धरे!।
ततः कल्पसहस्रान्ते सप्तद्वीपेश्वरो भवेत्॥
आयुरारोग्यसम्पन्नो जन्मातीतो भवेत्ततः।
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः॥
पापान्येतानि सर्व्वाणि श्रवणेनैव नाशयेत्॥
यश्चेह धीमानधनोऽपि भक्त्या
सुप्रीत्यनुष्ठ इह धीयमानः।
शृणोति भक्तस्य मतिं ददाति
विकल्मषः सोऽपि दिवं प्रयाति॥
दुःस्वप्नं प्रशमसुपैति पठ्यमाने
माहात्म्ये भवभयहारके नरस्य।
यः कुर्य्याद्व्रतवरमेतदव्ययाया
बोधिन्याः किमुत फलन्तु तस्य वाच्यम्॥
ते धन्यास्ते कृतार्थाश्च तैरेव सुकृतं कृतम्।
तैरात्मजन्म सफलं कृतं ये व्रतकारकाः॥"
इति वराहपुराणे प्रबोधिनीमाहात्म्यम्॥

प्रभञ्जनः, पुं, (प्रकर्षेण भनक्ति वृक्षादीनिति। प्र+भन्ज्+युच्।) वायुः। इत्यमरः। १।१।६६॥ (यथा, महाभारते। ७। १५४। ७८।
"घटोत्कचसुतः श्रीमान् भिन्नाञ्जनचयोपमः।
ररोध द्रौणिमायान्तं प्रभञ्जनमिवाद्रिराट्॥"
मणिपुराधिपतिराजविशेषः। यथा,—महाभारते। १। २१७। १६।
"राजा प्रभञ्जनो नाम कुलेऽस्मिन् सम्बभूव ह।
अपुत्त्रः प्रसवेनार्थी तपस्तेपे स उत्तमम्॥")
भञ्जनकर्त्तरि, त्रि॥ (यथा, हरिवंशे। २४५। १३।
"प्रभञ्जनो यो लोकानां युगान्ते सर्व्वनाशनः॥"
यथा च महाभारते। १। १२३। १२।
"सा समन्या विहस्याह पुत्त्रं देहि सुरोत्तम!।
बलवन्तं महाकायं सर्व्वदर्पप्रभञ्जनम्॥")

प्रभद्रः, पुं, (प्रकृष्टं भद्रं यस्मात्।) निम्बः। इति राजनिर्घण्टः॥ (प्रकृष्टो भद्र इति प्रादि-समासः। श्रेष्ठे, त्रि॥)

प्रभद्रा, स्त्री, (प्रकृष्टं भद्रं यस्मात्। टाप्।) प्रसारिणी। इति राजनिर्घण्टः॥

प्रभवः, पुं, (प्रभवत्यस्मादिति। प्र+भू+"अकर्त्तरि च कारके" इत्यधिकारात् अपादानार्थे। "ऋदोरप्।" ३। ३। ५७। इति अप्।) जन्महेतुः। पित्रादिः। आद्योपलब्धिस्थानम्। आद्योपलब्धये प्रथमज्ञानार्थं यत् स्थानं देशः सः। यथा। वाल्मीकिः श्लोकप्रभवः। हिमवान् गङ्गाप्रभवः। इत्यमरभरतौ॥ अपां मूलम्। मुनिभेदः। इति हेमचन्द्रः॥ पराक्रमः। इति मेदिनी। वे, ४१॥ जन्म। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। ८२।
"विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम्।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति॥"
सृष्टिः। यथा, देवीभागवते। १। १६। २।
"महाशक्त्या प्रभावेन त्वं मां विस्मृतवान् पुरा।
प्रभवे प्रलये जाते भूत्वा भूत्वा पुनः पुनः॥"
साध्यभेदः। यथा, हरिवंशे। १८६। ४४।
"धर्म्मात्मजसुतान्नवः कामः साध्यासाध्यान् व्यजायत।
प्रभवं च्यवनञ्चैवमीशानं सुरभीस्तथा॥"
त्रि, प्रभूतः। यथा, ऋग्वेदे। २। ३८। ५।
"नानौकांसि दुर्य्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः॥"
"प्रभवः प्रभूतो अग्नेः शोकस्तेजः।" इति तद्भाष्ये सायनः॥)

प्रभविष्णुः, पुं, (प्रभवितुं शीलमस्येति। प्र+भू+"भुवश्च।" ३। २। १३८। इति इष्णुच्।) वटुकभैरवस्याष्टोत्तरशतनामान्तर्गतनामविशेषः। यथा। "प्रभविष्णुः प्रभाववान्।" इत्यादि विश्वसारतन्त्रे आपदुद्धारकल्पः॥ प्रभुः। यथा,
"न भर्त्ता नैव च सुतो न पिता भ्रातरो न च।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः॥"
इति दायभागः॥
प्रकर्षेण भवनशीले, त्रि॥

प्रभविष्णुता, स्त्री, प्रभुता। प्रभविष्णुशब्दात् भावार्थे तप्रत्ययेन पदं निष्पन्नम्॥ (यथा, राजतरङ्गिण्याम्। २। ४७।
"यदासाध्यानि दुःखानि च्छेत्तुं न प्रभविष्णुता।
तत्क्षितिपाल! महतां महत्त्वस्य किमङ्कनम्॥")